# पाणिनीयशाकटायनशब्दानुशासनस्थसमाससामान्यसूत्रविचारः

**वैद्यसुब्रह्मण्यः**

**पाणिनीयशब्दानुशासने समासायोपयुज्यमानानि सामान्यसूत्राणि –**

शालातुरीयस्य अष्टाध्याय्याम् द्वितीयाध्यायस्य प्रथमे पादे तृतीयं सूत्रमस्ति **प्राक्कडारात् समासः** इति।

**संज्ञा च परिभाषा च विधिर्नियम एव च। अतिदेशोऽधिकारश्च सूत्रं षड्विधं स्मृतम्॥**

इति अभ्युक्तोक्तरीत्या षट्प्रकारकसूत्रेषु इदमधिकारसूत्रमस्ति । इदमेव सूत्रं प्रधानतया समाससंज्ञाविधायकम् अस्ति । **कडाराःकर्मधारये**[१] इति सूत्रपर्यन्तं समासः इति संज्ञा अधिक्रियते । **प्राक्कडारात् समासः**[२] इत्यस्य सूत्रस्य **कडाराः कर्मधारये** इत्यतः प्राक् समासः इति संज्ञा प्राक् कर्तव्या इत्यर्थः । **अव्ययीभावः**[३], **तत्पुरुषः**[४], **शेषो बहुव्रीहिः**[५], **चार्थे द्वन्द्वः**[६] इति चतुर्भिःसमासविशेषसंज्ञाविधायकसूत्रैःविधीयमानाभिः समासविशेषसंज्ञाभिः समासः इति संज्ञायाः समावेशार्थं **प्राक्कडारात् समासः** इति सूत्रे **प्राक्** इति पदमावर्त्य समासविशेषसंज्ञाविधानात् प्राक् समासः इति संज्ञा कर्तव्या इत्युक्तम्। अन्यथा **प्राक्** पदावृत्त्यभावे तत्पुरुषादिसंज्ञाभिः सह समाससंज्ञायाः समावेशो न स्यात्। यतः प्रथमाध्यायस्य चतुर्थे पादे **आकडारादेका संज्ञा**[७] इति सूत्रमस्ति। **कडाराः कर्मधारये** इति सूत्रपर्यन्तं एकस्य एका एव संज्ञा कार्या इति तत्सूत्रार्थः। अतः एकस्य एकैव संज्ञा कार्या इत्युक्तत्वात् समाससंज्ञया सह समासविशेषसंज्ञाभिः तत्पुरुषादिसंज्ञाभिः समावेशो न स्यात्। अतः समाससंज्ञया सह समासविशेषसंज्ञानां तत्पुरुषादिसंज्ञानां समावेशार्थं **प्राक्कडारात् समासः** इति सूत्रे प्राक् पदम् आवर्तितम्।

पाणिनीयशब्दानुशासने समासमात्रे उपयुज्यमानानि सामान्यसूत्राणि चत्वारि वर्तन्ते । तानि च **समर्थः पदविधिः**[८], **सुपो धातुप्रातिपदिकयोः**[९], **प्रथमानिर्दिष्टं समास उपसर्जनम्**[१०], **उपसर्जनं पूर्वम्**[११] इति। एतेषां सूत्राणाम् अर्थः अत्र निरूप्यन्ते।

येषां शब्दानां परस्परं व्यपेक्षासामर्थ्यम् अस्ति अर्थात् परस्परम् अन्वयः भवति ते शब्दाः समस्यन्ते अर्थात् एकीभवन्ति इति **समर्थः पदविधिः** इति सूत्रस्य अर्थः ।

धातुप्रातिपदिकावयवयोः सुपः लुक् स्यात् इति **सुपो धातुप्रातिपदिकयोः** इति सूत्रार्थः। यथा – राजन् ङस् पुरुष सु इत्यवस्थायां **षष्ठी**[१२] इति सूत्रेण समासे,समासत्वात् प्रातिपदिकसंज्ञायां, प्रातिपदिकावयवत्वात् तत्र सुपः अनेन सूत्रेण लुग् भवति।

समासविधायकशास्त्रे यत् प्रथमानिर्दिष्टं तत् उपसर्जनसंज्ञं स्यात् इति **प्रथमानिर्दिष्टं समास उपसर्जनम्** सूत्रार्थः। यथा राजन् ङस् पुरुष सु इत्यत्र **षष्ठी** इति सूत्रेण समासो भवति। षष्ठ्यन्तं समर्थेन सुबन्तेन समस्यते इति तदर्थः। एतत्समासविधायकशास्त्रे षष्ठ्यन्तम् इत्येतत् प्रथमाविभक्तौ निर्दिष्टम् अस्ति। अतः षष्ठ्यन्तस्य उपसर्जनसंज्ञा सिद्ध्यति। तथा च लक्ष्ये राजन् ङस् पुरुष सु इत्यत्र राजन् ङस् इत्यस्य षष्ठ्यन्तत्वात् तस्य उपसर्जनसंज्ञा लप्स्यते अनेन सूत्रेण।

**प्रथमानिर्दिष्टं समास उपसर्जनम्** इति सूत्रेण यस्य उपसर्जनसंज्ञा विहिता तस्य पूर्वनिपातः विधीयते **उपसर्जनं पूर्वम्** इति सूत्रेण। समस्यमानयोः द्वयोः पदयोः कस्य पदस्य पूर्वप्रयोगः कर्तव्यः इति नियमयितुं सूत्रमिदम् आरब्धम् अस्ति। अन्यथा समस्यमानयोः पदयोः पर्यायेण पूर्वप्रयोगापत्तिः। यथा राजन् ङस् पुरुष सु इत्यत्र **प्रथमानिर्दिष्टं समास उपसर्जनम्** इति सूत्रेण राजन् ङस् इत्यस्य उपसर्जनसंज्ञायां कृतायाम् , तस्य पूर्वप्रयोगः भवति। अत एव समस्ते पदे राजपुरुषः इत्यत्र राजन्शब्दस्य पूर्वत्र श्रवणम्।

इमानि सूत्राणि सर्वसमासोपयोगीनि अतिमुख्यानि सूत्राणि वर्तन्ते। यद्यपि इमानि सूत्राणि विहाय समासाय उपयुज्यमानानि अन्यानि बहूनि सूत्राणि सन्ति। कर्मधारयसमासे तथा बहुव्रीहिसमासे च पुंवद्भावविधायकसूत्राणि, पुंवद्भावनिषेधकसूत्राणि, तथा **सुपो धातुप्रातिपदिकयोः** इति सूत्रेण विहितस्य सुब्लुकः निषेधकानि सूत्राणि, एवं द्वन्द्वसमासे पूर्वनिपातविधायकानि सूत्राणि, बहुव्रीहिसमासे पूर्वनिपातविधायकानि सूत्राणि,समासस्यैकवद्भावविधायकानि सूत्राणि, समासस्य लिङ्गविधायकानि सूत्राणि इति समासाय उपयुज्यमानानि अन्यानि सूत्राणि। तथापि सर्वसमासोपयोगीनि अतिमुख्यानि सूत्राणि यानि वर्तन्ते तेषां शाकटायनशब्दानुशासने सर्वसमासायोपयुज्यमानैः सामान्यसूत्रैः सह तुलनात्र चर्चिता।

**शाकटायनशब्दानुशासने समासायोपयुज्यमानानि सामान्यसूत्राणि –**

शाकटायनशब्दानुशासने च समासोपयुज्यमानानि सामान्यसूत्राणि सन्ति। शाकटायनस्य शब्दानुशासने द्वितीयाध्यायस्य प्रथमे पादे सूत्रमस्ति **सुप्सुपा समासो बहुलम्**[१३] इति। इदमेव सूत्रं

अस्मिन् शब्दानुशासने प्रधानतया समासं विदधाति । अस्मात् सूत्रात् समासः इति पदं **द्वन्द्वः सहोक्तौ**[१४] इति सूत्रपर्यन्तमधिक्रियते । शाकटायनेनापि निजप्रनिबद्धशब्दानुशासने च प्राचीनव्याकरणेषु उपलभ्यमानाः परिभाषाः आद्रियन्ते । अत्रापि **प्रत्ययग्रहणे यस्मात् स विहितः तदादेः तदन्तस्य ग्रहणम्**[१५] इति परिभाषया सुप्शब्देन सुबन्तमुपस्थाप्यते । तथा च **सुबन्तं सुबन्तेन सह समाससंज्ञं भवति बहुलम्** इति सूत्रार्थः सिद्धः । अत्र शाकटायनशब्दानुशासने **एकसंज्ञाधिकारश्च नास्ति** । अर्थात् पाणिनीयशब्दानुशासनस्थं **आकडारादेका संज्ञा** इति सूत्रसमानार्थकं सूत्रं नास्ति, येन पाणिनीयशब्दानुशासने इव द्वयोः संज्ञयोः असमावेशः स्यादिति । अतः समाससंज्ञायाः समासविशेषसंज्ञाभिः असमावेशभीश्च नास्ति । अतः तद्विया समाससंज्ञायाः समासविशेषसंज्ञाभिः समावेशार्थं **प्राक्कडारात् समासः** इति सूत्रस्थप्राक्पदावृत्तिसदृशः यत्नश्च नास्त्यत्र ॥

पाणिनिरिव **प्राक्कडारात् समासः** इति शाकटायनः पृथक्समाससंज्ञाविधायकं सूत्रं न अरचयत् । इदमत्र लाघवं दृश्यते शाकटायनव्याकरणे । किञ्च **सह सुपा**[१६] इति सूत्रे **सुपा इति योगविभागात्** सुबन्तं समर्थेन सह समस्यते इत्यर्थसिद्ध्या क्वचित् तिङन्तेनापि समासो भवति । तेन अनुव्यचलत् , पर्यभूषयत् इत्यादिरूपाणि सिद्ध्यन्ति । इमानि रूपाणि **सुप्सुपा समासो बहुलम्** इति सूत्रे बहुलग्रहणात् सिद्ध्यन्ति ।

शाकटायनशब्दानुशासने समासमात्रे उपयुज्यमानानि सामान्यसूत्राणि त्रीणि वर्तन्ते । **योगे**[१७] , **सूक्तं पूर्वम्**[१८] , **प्रत्ययस्य च सुपः श्लुक्**[१९] इति सूत्राणि त्रीणि वर्तन्ते । पाणिनिना रचितम् सूत्रं **प्रथमानिर्दिष्टं समास उपसर्जनम्**, शाकटायनेन त्यक्तं दृश्यते । पाणिनिः **प्रथमानिर्दिष्टं समास उपसर्जनम्** इति सूत्रेण उपसर्जनसंज्ञां विधाय उपसर्जनसंज्ञकस्य **उपसर्जनं पूर्वम्** इति सूत्रेण पूर्वनिपातनं विदधाति । परन्तु शाकटायनः उपसर्जनसंज्ञाम् अविधाय साक्षात् समासविधायकशास्त्रे प्रथमान्तपदवाच्यस्य पूर्वनिपातनं विदधाति । अतः उपसर्जनसंज्ञामनुपजीव्यैव समासविधायकशास्त्रे प्रथमान्तपदवाच्यस्य पूर्वनिपातो भवति इति उपसर्जनसंज्ञाविधायकशास्त्रानुसन्धानावश्यकता नास्ति इति महल्लाघवं वर्तते ।

**प्रत्ययस्य च सुपः श्लुक्** इति हि सूत्रम् । अत्र समासस्य इति पदमनुवर्तते । तदर्थमेव सूत्रे चकारः । समासस्य प्रत्ययस्य च निमित्तस्य सुपः श्लुग् भवति इति तदर्थः । यथा –राजन् ङस् पुरुष सु इत्यत्र **षष्ठ्ययत्नात्**[२०] इति सूत्रेण समासे जाते , **प्रत्ययस्य च सुपः श्लुक्** इति हि सूत्रेण समासस्य

निमित्तभूतस्य सुपः श्लुकि , **सूक्तं पूर्वम्** इति सूत्रेण समासविधायकशास्त्रे प्रथमान्तपदवाच्यस्य पूर्वनिपाते राजपुरुषशब्दात् सुबुत्पत्तौ राजपुरुषः इति रूपं सिद्ध्यति ।

पाणिनिः **सुपो धातुप्रातिपदिकयोः** इति सूत्रम् अरचयत् । धातुप्रातिपदिकावयवयोः सुपः लुक् स्यात् इति **सुपो धातुप्रातिपदिकयोः** इति सूत्रार्थः। यथा –राजन् ङस् पुरुष सु इत्यवस्थायां **षष्ठी** इति सूत्रेण समासे,समासत्वात् प्रातिपदिकसंज्ञायां, प्रातिपदिकावयवत्वात् तत्र सुपः अनेन सूत्रेण लुग् भवति । पाणिनिः **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्**[२१], **कृत्तद्धितसमासाश्च**[२२] इति सूत्राभ्यां प्रातिपदिकसंज्ञाम् विधाय तां संज्ञाम् उपजीव्यैव **सुपो धातुप्रातिपदिकयोः** इति सूत्रेण सुब्लुकं विदधाति । परन्तु शाकटायनः प्रातिपदिकसंज्ञायाः विधानम् अकृत्वैव तद्संज्ञाम् अनुपजीव्यैव **प्रत्ययस्य च सुपः श्लुक्** इति सूत्रेण श्लुकं विदधाति इति अत्र महल्लाघवं दृश्यते ।

शाकटायनः **योगे** इति सूत्रं प्रनिबबन्ध । इदं सूत्रं संपूर्णं शास्त्रं यावदधिक्रियते । अत्र योगशब्दस्य सम्बन्धः इत्यर्थः । स यथायोगम् एकार्थता व्यपेक्षा च । येषां शब्दानां परस्परं व्यपेक्षायोगः अस्ति अर्थात् परस्परम् अन्वयः भवति तेषां शब्दानां वक्ष्यमाणानि कार्याणि भवन्ति इति **योगे** इति सूत्रस्य अर्थः । समासस्य वक्ष्यमाणत्वात् समासश्च योगे सत्येव अर्थात् संबन्धे सत्येव प्रवर्तते । इदं सूत्रं तावत् पाणिनेः **समर्थः पदविधिः** इति सूत्रतुल्यं वर्तते । **योगे** इति सूत्रादूर्ध्वमेव पञ्चापि वृत्तयः प्रोक्ताः । अतः पञ्चापि वृत्तयः योगे सत्येव अर्थात् संबन्धे सत्येव प्रवर्तन्ते । अत्र सूत्रे पाणिन्यपेक्षया मात्राकृतलाघवं संपादितं शाकटायनेन इति वक्तुं शक्यम् ॥

इमानि सूत्राणि विहाय समासाय उपयुज्यमानानि अन्यानि बहूनि सूत्राणि सन्ति । पाणिनिरिव शाकटायनश्च समासाय उपयुज्यमानानि अन्यानि बहूनि सूत्राणि रचितानि दृश्यन्ते । कर्मधारयसमासे तथा बहुव्रीहिसमासे च पुंवद्भावविधायकसूत्राणि, पुंवद्भावनिषेधकसूत्राणि, सुब्श्लुकः निषेधकानि सूत्राणि, एवं द्वन्द्वसमासे पूर्वनिपातविधायकानि सूत्राणि, बहुव्रीहिसमासे पूर्वनिपातविधायकानि सूत्राणि,समासस्यैकवद्भावविधायकानि सूत्राणि, समासस्य लिङ्गविधायकानि सूत्राणि इति समासाय उपयुज्यमानानि अन्यानि सूत्राणि रचितानि वर्तन्ते शाकटायनेन । अतिमुख्यत्वात् पाणिनीयशाकटायनशब्दानुशासनस्थसर्वसमासोपयुक्तानां सूत्राणां तुलनात्र यथाशक्ति यथामति कृता । शाकटायनः पाणिन्यपेक्षया स्वसूत्रेषु लाघवं प्रददर्श इति शोधनिबन्धस्य मदीयः निष्कर्षः ॥

१. अष्टाध्यायी सूत्रसंख्या (२-२-३८) कडारादयः शब्दाः कर्मधारये वा पूर्वं प्रयोज्याः
२. अष्टाध्यायी सू.सं (२-१-३) **कडाराः कर्मधारये** इत्यतः प्राक्समासः इत्यधिक्रियते।
३. अष्टाध्यायी सू.सं (२-१-५) अधिकारसूत्रम्। (२-१-२१) पर्यन्तम्।
४. अष्टाध्यायी सू.सं (२-१-२२) अधिकारोयम् , प्राग्बहुव्रीहेः। (२-२-२७) पर्यन्तम्।
५. अष्टाध्यायी सू.सं (२-२-२८) अधिकारोयम्। (२-२-२९) पर्यन्तम्।
६. अष्टाध्यायी सू.सं (२-२-३०) अनेकं सुबंभ चार्थे वर्तमानं वा समस्यते स द्वन्द्वः।
७. अष्टाध्यायी सू.सं (१-४-१) **कडाराः कर्मधारये** इत्यतः प्राक् एकस्य एक्ह्वैव संज्ञा ज्ञेया। या परा अनवकाशा च।
८. अष्टाध्यायी सू.सं (२-१-१) पदविधिः समर्थाश्रितो बोध्यः।
९. अष्टाध्यायी सू.सं (२-४-७१) एतयोरवयवस्य सुपः लुक् स्यात्।
१०. अष्टाध्यायी सू.सं (१-२-४३) समासशास्त्रे प्रथमानिर्दिष्टम् उपसर्जनसंज्ञम स्यात्।
११. अष्टाध्यायी सू.सं (२-२-३०) समासे उपसर्जनं प्राक्प्रयोज्यम्।
१२. अष्टाध्यायी सू.सं (२-२-८)
१३. शाकटायनशब्दानुशासनम् सू.सं (२-१-१) सुबन्तं सुबन्तेन सह समाससंज्ञं भवति बहुलम्।
१४. शा.श., सू.सं (२-१-८०) सुबन्तं सुबन्तेन सह सहवचने समस्यते स च समासः द्वन्द्वसंज्ञो भवति।
१५. **नागेशभट्ट** विरचितः परिभाषेन्दुशेखरः, परिभाषा संख्या २३।
१६. अष्टाध्यायी सू.सं(२-१-४) सुबन्तं समर्थेन सह समस्यते।
१७. शाकटायनशब्दानुशासनम् सू.सं (२-१-१) सुबन्तं सुबन्तेन सह समाससंज्ञं भवति बहुलम्।
१८. शा.श., सू.सं (२-१-८०) सुबन्तं सुबन्तेन सह सहवचने समस्यते स च समासः द्वन्द्वसंज्ञो भवति।
१९. **नागेशभट्ट** विरचितः परिभाषेन्दुशेखरः, परिभाषा संख्या २३।
२०. अष्टाध्यायी सू.सं(२-१-४) सुबन्तं समर्थेन सह समस्यते।
२१. शाकटायनशब्दानुशासनम् सू.सं (१-३-९३) अधिकारोयम् आशास्त्रपरिसमाप्तेः। यदितः ऊर्ध्वम् अनुक्रमिष्यामः तत्सति योगे भवति नासतीति वेदितव्यम्।
२२. शाकटायनशब्दानुशासनम् सू.सं (२-१-१०८) समासविधाने सुना प्रथमान्तेन निर्दिष्टं पूर्वं प्रयोक्तव्यम्।
२३. शाकटायनशब्दानुशासनम् सू.सं (२-२-१) समासस्य इति वर्तते। समासस्य प्रत्ययस्य च निमित्तस्य सुपः श्लुग्भवति।
२४. शाकटायनशब्दानुशासनम् सू.सं (२-१-४३) षष्ठ्यन्तं सुबन्तेन सह समसस्यते वा स तत्पुरुषश्च समासो भवति। अयत्नात् , ङसोसाम् इति। षष्ठ्याः कर्मादौ द्वितीयादिके अपवादे सति न विनिमेयद्यूतपणम् इत्यादेः यत्नाद्विशेषे चेत् सा न प्रापिता भवति।
२५. अष्टाध्यायी सू.सं (१-२-४५) धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवत् शब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात्।
२६. अष्टाध्यायी सू.सं (१-२-४६) कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः।

## संदर्भग्रन्थाः -


- **पाणिनीयाष्टाध्यायी**।
- भट्टोजिदीक्षितेन विरचिता **वैयाकरणसिद्धान्तकौमुदी बालमनोरमा तत्त्वबोधिनी** व्याख्याद्वययुता मोतीलाल बनारसीदास २००१
- **शाकटायनेन** विरचितं **शाकटायनशब्दानुशासनम्** स्वोपज्ञा**मोघवृत्ति** युतम् भारतीय ज्ञानपीठ प्रकाशन पण्डित शंभुनाथ त्रिपाठी संपादित १९७१।
- **नागेशभट्ट** विरचितः परिभाषेन्दुशेखरः।